# मेधा सूक्तम्

ॐ यश्छन्दसामृषभो विश्वरूपः । छन्दोभ्योऽध्यमृताथ्सम्बभूव ।
स मेन्द्रो मेधया स्पृणोतु । अमृतस्य देवधारणो भूयासम् ।
शरीरं मे विचर्षणम् । जिह्वा मे मधुमत्तमा ।
कर्णाभ्यां भूरिविश्रुवम् । ब्रह्मणः कोशोऽसि मेधया पिहितः ।
श्रुतं मे गोपाय ।

ॐ शान्तिः शान्तिः शान्तिः ॥

ॐ मेधादेवी जुषमाणा न आगाद् विश्वाची भद्रा सुमनस्यमाना ।
त्वया जुष्टा नुदमाना दुरुक्तान् बृहद्वदेम विदथे सुवीराः ।
त्वया जुष्ट ऋषिर्भवति देवि त्वया ब्रह्माऽऽगतश्रीरुत त्वया ।
त्वया जुष्टश्चित्रं विन्दते वसु सानो जुषस्व द्रविणोन मेधे ॥

मेधां म इन्द्रो ददातु मेधां देवी सरस्वती ।
मेधां मे अश्विनावुभा वाधत्तां पुष्करस्रजा ।
अप्सरासु च या मेधा गन्धर्वेषु च यन्मनः ।
दैवीं मेधा सरस्वती सा मां मेधा सुरभिर्जुषताम् ॥

आमां मेधा सुरभिर्विश्वरूपा हिरण्यवर्णा जगती जगम्या ।
ऊर्जस्वती पयसा पिन्वमाना सा मां मेधा सुप्रतीका जुषन्ताम् ॥

मयि मेधां मयि प्रजां मय्यग्निस्तेजो दधातु
मयि मेधां मयि प्रजां मयीन्द्र इन्द्रियं दधातु
मयि मेधां मयि प्रजां मयि सूर्यो भ्राजो दधातु ॥

ॐ शान्तिः शान्तिः शान्तिः ॥

# Medhā Suktam

Om yaśchandasām ṛṣabho viśvarupā
chandobhyo'dhyamṛtāth-sambabhūva
sa mendro medhayā spṛnotu
amṛtasya devadhārano bhūyāsam
śarīram me vicarṣaṇam
jivhā me madhumattamā
karṇābhyām bhūriviśruvam
brahmaṇa kośo'si medhayā pihitaḥ
śrutam me gopāya
Om śāntiḥ śāntiḥ śāntiḥ

Om Medhā Devī juṣamāṇā na āgād
viśvācī bhadrā sumanasyamānā

tvayā juṣṭā nudamānā duruktān
bṛhad vadema vidathe suvīrāḥ

tvayā juṣṭa ṛṣir bhavati devī
tvayā brahmāāgataśrīr uta tvayā

tvayā juṣṭaś citram vindate vasu
sā no juṣasva draviṇona Medhe

medhām ma indro dadātu medhām devī sarasvatī
medhām me aśvināv ubhav ādhattām puṣkarasrajā

apsarāsu ca yā medhā gandharveṣu ca yan manaḥ
daivīm medhā Sarasvatī sā mām Medhā Surabhir juṣatām

ā mām medhā surabhir viśvarūpā hiraṇyavarṇā jagatī jagamyā
ūrjasvatī payasā pinvamānā sā mām Medhā supratīkā juṣantām

mayi medhām mayi prajām mayi agnistejo dadhātu
mayi medhām mayi prajām mayi indra indriyam dadhātu
mayi medhām mayi prajām mayi sūryo bhrājo dadhātu

Om śāntiḥ śāntiḥ śāntiḥ